**अन्तर्भाव** पु॰ अन्तर्मध्ये भावः प्रवेशः। मध्यप्रवेशे समुदायमध्यपाते। "आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मक" इति हरिका॰ स्वविषयकज्ञानविषयत्वे च भवति च वह्निमद्बोधविषयत्वाद्वह्नेर्वह्निमदन्तर्भावः। अन्तःस्थोभावः। चित्तवृत्तिभेदे।

**अन्तर्भावना** स्त्री अन्तःस्था व्यञ्जकचेष्टाकारादिरहिता भावना। व्यञ्जकचेष्टादिशून्ये चिन्तने।

**अन्तर्भावित** त्रि॰ अन्तर्+भू—णिच्—क्त। मध्यप्रवेशिते समुदायान्तर्भूतीकृते। "अन्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वतः। नान्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वत" इति खण्डनखण्डखाद्यम्। अव्यवहितपूर्ववर्त्तितया कारणस्य यत् सत्त्वमुररीक्रियते तस्य सत्त्वमस्ति न वा तस्य सत्त्वस्वीकारे पुनस्तत्सत्त्वस्य सत्त्वस्वीकारेऽनवस्थापातः ततश्च उत्तरत्र एकस्य सत्त्वमनङ्गीकृत्यैव अनवस्था वारणीया तथाच कारणसत्त्वेऽपि कुतः तथा नाङ्गीक्रियते। एवं च विनापि सत्त्वं, तदङ्गीकृत्य कारणतास्वीकारे न कोऽपि दोषोऽस्ति इति तदाशयः।

**अन्तर्भूत** त्रि॰ अन्तर्मध्ये भूतः भू+क्त। मध्यस्थिते, अन्तर्गते च। "कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते" इति हरिका॰ "एष वै भगवान् विष्णुरन्तर्भूतः सनातन" इति पुरा॰।

**अन्तर्मनस्** त्रि॰ अन्तर्गतं वाह्यव्यापारशून्यतया अन्तरेव स्थितं मनो यस्य। व्याकुलचित्ते, समाहितमनस्के च। दुःखितस्य हि वाह्येतदितरव्यापारशून्यतया तत्प्रतीकारचिन्तनायान्तरेव मनसः स्थितत्वात् तथात्वम् समाधिस्थस्य तु वाह्यविषयपरिहारेण ध्येयात्ममात्रगोचरमनस्कतया तथात्वमिति भेदः।

**अन्तर्मुख** त्रि॰ अन्तःपरमात्मा मुखं प्रवेशद्वारं यस्य। वाह्यवस्तुपरिहारेण परमात्मविषयकतया प्रवेशयुक्ते चित्तादौ। अन्तरभ्यन्तरे मुखं यस्य। सुश्रुतोक्ते व्रणस्रावणसाधने शस्त्रभेदे न॰। "सूचीकुशपत्राचीमुखशरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे" इति सुश्रुतम्। अन्तःकरणं अविद्यावृत्तिरूपं द्वारं सुखानुभवे यस्य। स्वरूपसुखानुभवहेतुना अविद्यावृत्तिरूपान्तःकरणेन सुषुप्तौ आनन्दानुभवकारके प्राज्ञाख्ये जीवभेदे "आनन्दभुक् चेतोमुखः प्राज्ञः" इति श्रुतौ प्राज्ञस्य आनन्दभोगे चेतोमुखत्वोक्त्या तथात्वम्। मुखस्य मध्यम् अव्ययी॰। मुखस्य मध्ये इत्यर्थे अव्य॰।

**अन्तर्मातृका** स्त्री अन्तःस्था षट्चक्रस्था मातृका अकारादिवर्णाः। तन्त्रोक्तेषु षट्पद्मस्थेषु अकारादिषु वर्णेषु। ते च वर्णा अन्तर्मातृकान्यासशब्देऽनुपदं वक्ष्यन्ते।

**अन्तर्मातृकान्यास** पु॰ अन्तःस्थाया मातृकाया न्यासः उच्चारणपूर्व्वकं तत्तत्स्थानेषु न्यासः। अन्तस्थमातृकावर्णानां स्मरणपूर्व्वकं तत्तत्स्थानेषु न्यासे। यथा 'न्यासोऽयमान्तर" इत्युपक्रम्य "द्व्यष्टपत्राम्बुजे कण्ठे स्वरान् षोड़श विन्यसेत्। द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत्। दशपत्राम्बुजे नाभौ डकारादीन्न्यसेद्दश। षट्पत्रमध्ये लिङ्गस्थे बकारादीन्न्यसेच्च षट्। आधारे चतुरोवर्णान् न्यसेद्वादीन् चतुर्द्दले। हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये!। तन्मध्ये परविन्दुञ्च सृष्टिस्थितिलयात्मकम्। एवं समाहितमना ध्यायेन्न्यासोयमान्तरः" इति तन्त्रसारः।

**अन्तर्मृत** पु॰ स्त्री अन्तर्गर्भाशये मृतः। गर्भाशये मृते बालकादौ 'भवत्युच्छासपूतिश्च शूलं चान्तर्मृते शिशौ" इति सुश्रुतम्।

**अन्तर्य्य** त्रि॰ अन्तरे भवः दिगा॰य। मध्यभवे।

**अन्तर्याग** पु॰ अन्तरन्तःकरणेन मनसा कल्पितोपचारैर्यागः पूजा होमश्च। तन्त्रोक्ते मानसोपचारैः पूजने, होमभेदे च। "अर्च्चयन् विषयैः पुष्पैस्तत्क्षणात् तन्मयो भवेत्। न्यासैस्तन्मयताबुद्धिः सोऽहंभावेन पूजयेत्"। तन्मयेति तदेकत्वज्ञानं सोऽहमिति, "मन्त्राक्षराणि तच्छक्तौ प्रोतानि परिभावयेत्। तामेव परमव्योम्नि परमानन्दवृंहिते। दर्शयत्यात्मसद्भावं पूजा होमादिभिर्विनेति"। विषयपुष्पाणि यथा। अमायामनहङ्कारमरागममदं तथा। अमोहकमदम्भञ्च अनिन्दाऽक्षोभकौ तथा। अमात्सर्य्यमलोभञ्च दशपुष्पं विदुर्बुधाः। अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः। दया पुष्पं क्षमा पुष्पं ज्ञानं पुष्पञ्च पञ्चमम्। इत्यष्टसप्तभिः १५ पुष्पैः पूजयेत् परदेवताम्"। अथ होमः। "आत्मानमपरिच्छिन्नं विभाव्यात्मानमन्तरा परमात्मज्ञानमेकस्वरूपं संविभाव्य च। चतुरस्रं तु चित्कुण्डमानन्दमेखलायुतम्। अर्द्धमात्राकृतिर्योनिस्तया चैव विभूषितम्। नाभौ ध्यात्वा तन्मयस्थज्ञानाग्नौ जुहुयात् यथा। मूलान्ते नाभिचैतन्यरूपाग्नौ हविषा स्रुचा। ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहम्"। (स्वाहा इति प्रथमाहुतिः, मूलान्ते) धर्म्माधर्म्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा। सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम्"। (स्वाहेति द्वितीयाहुतिः, मूलान्ते) "प्रकाशाकाशहस्ताभ्यां अवलम्बन्मनःस्रुचा। धर्म्माधर्म्मकलास्नेहपूर्णमग्नौजुहोम्यहम्"। (स्वाहेति तृती-